CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.13

Coll. No. 423

Title Rātri sūkta

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 423
Subject: Vedic lit.
Title: Rātri sūkta
Author: — .
Scribe: Dixit śivaśankara
Date of the work: —
Date of the Ms.: —
Place of the work: —
Place of the Ms.: —
Size: 6" by 4.4"
Extent: 3 foll.
Language: Sanskrit
Script: Devanāgarī
Remarks:

॥ दिरुलसदाशंकरनुरात्रिसुक्कछे।पत्र३।

॥हिं।सघारीकरनंपित्रहे

धाम वंदन वढीतेक
पुनआदा

[redacted]

श्री

श्रीगणेशायनमः॥ ॥ॐरात्रीव्यख्यदायतीपुरुत्रा
देव्य१क्षभिः॥विश्वाअधिश्रियोधित॥उर्वप्राअ
मर्त्यानिवतोदेव्यु१द्वतः॥ज्योतिषाबाधतेतमः॥नि
रुस्वसारमस्कृतोषसंदेव्यायती॥अपेदुहासते
तमः॥सानोअद्ययस्यावयंनितेयावंनविक्ष्महि॥
वृक्षेनवसतिंवयः॥निग्रामासोअविक्षतनिपद्वं
तोनिपक्षिणः॥निश्येनासश्चिदर्थिनः॥यावया
वृक्य१ंवृकंयवयस्तेनमूर्म्ये॥अथानःसुतराभ
व॥उपमापेपिशत्तमःकृष्णंव्यक्तमस्थितउषऋणे

॥१॥

वयातय॥उपतेगाइवाकरंवृणीष्वदुहितर्दि
वः॥रात्रिस्तोमंनजिग्युषे॥१॥आरात्रिपार्थि
वंरजःपितुरप्रायिधामभिः॥दिवःसदांसिबृह
तीवितिष्ठसआत्वेषंवर्त्ततेतमः॥येतेरात्रिनृच
क्षसोयुक्तासोनवतिर्नव॥अशीतिःसंत्वष्टाउ
तोतेसप्तसप्ततिः॥रात्रिंप्रपद्येजननींसर्वभूत
निवेशनीं॥भद्रांभगवतींकृष्णांविश्वस्यजग
तोनिशां॥संवेशनींसंयमनींग्रहनक्षत्रमालि
नीं॥प्रपन्नोहंशिवांरात्रींभद्रेपारमशीमहि॥

आदित्यवर्णांतपसाज्वलंतींवैरोकिणीं।चद्रस
हस्रदीप्तीं।।दैवीऋषिभिश्चपूजितांतांदुर्गमाताश
रणंप्रपद्ये।।दुर्गेषुविषमेषुत्वंसंग्रामेषुवनेषुच।।
नमस्कृत्वाप्रपद्यंतेतेषांनोअभयंकुरु।।क्षीरेण
स्नपितादुर्गाचंदनेनानुलेपिता।।बैल्वपत्रलता
मालानमोदुर्गेनमोनमः।।सर्वभुतपिशाचेभ्यः
सर्वसप्सिरीसृपैः।।देवेभ्योमानुषेभ्यश्चोनय
भ्योमानिरक्षतां।।२।।ऋग्वेदस्तुतयादेवीकाश्य
पेनउदाहृता।।जातवेदप्रनागौरीजातवेदसे
सुनवामसोमं।।

।।२।।

सुरासुरैर्द्विजवरैःपिषाचासुरराक्षसैः।।अरा
तीनयमुत्पन्नमरातीयतोनिर्दहातिवेदः।।राज
द्वारेपथेघोरेसंग्रामेषुचगोतमं।।सर्वैरक्षुर
दुरितंसनःपर्षदतिदुर्गाणिविश्वा।।मरुद्रूये
समुत्पन्नेस्मरंतिचरूपंतिचः।।सर्वैतारयतेदु
र्गानिनावेवसिंधुंदुरितात्यग्निः।।यइमंस्तवदुर्गा
याःपठंतिचशृणोतिच।।त्रिषुलोकेषुविख्या।तेत्रि
षुलोकेषुपूजितं।।अपुत्रोलभतेपुत्रान्धन
हीनोधनंलभेत।।अपचक्षुर्लभतेचक्षुर्बद्धोमु

च्येतबंधनात ॥ व्याधितोमुच्यतेरोगादारोगी॥श्रि
यम्माप्नुयातसर्वकामितंददातिनारायणिनमो
स्तुतेकात्यायनिनमोस्तुते॥ दुर्गादुर्गेषुस्थाने
षुशंनोदेवीरन्निष्टये॥ एवंदुर्गास्तवंपुण्यंरात्रौ
रात्रौसदापठेत॥ ३॥ इतिरात्रिसुक्तसमा
प्तः॥ ॥ श्री ॥ ॥ ई ॥ ॥
॥ दिहुतशिवसंकरेण लिखितं ॥ ॥

॥३॥

[illegible] गवलडाबुहोवतो
ह ह्रं ह्रुं ह्रुं ह हुम ह दि ह है र्तिं [illegible]
ॐकारंदिव्यंवास्थायां ॐदलि [illegible]
दिव्योरत्नोवलिकेनूतां ॐदलिदलि

आगीगदि